एवं दर्पणागतमुखप्रतिविंबस्य वस्तुभावहानत्वादिकमिति भावः। ननूक्तोपाधिकृतो भेद इत्ययुक्तं स्वरूपत एव भेदादित्यत आह एवं नन्मत इति द
र्पणस्थविबत्वे बाधकमाकाशे नास्तीति सर्वानुयायित्वं तस्यादित्युपपत्तेः तत्र सर्वोपादानत्वं न स्यात्। दिवो ध्येयपरिच्छिन्नस्यैव बिंबस्य प्रतिबिंबदर्शना
द्वात्तत्वनियमो नापरिच्छिन्नस्येत्याह नेति ननु महाकाशो जलादौ न प्रतिबिंब्यते नन्वाकाशस्यैव मानसंभवादित्याशंक्याह साभ्रेति नन्वाभ्रादि
कमेवात्र प्रतिबिंबतं न महाकाश इति वाच्यं प्रत्यभिज्ञानविरोधात्। किं नीरूपे प्रतिबिंबाभावनियमो नीरूपद्रव्ये नेत्याद्यं निराकृत्य द्वितीय
मनूद्य रूपयति नचेति श्यामानद्व्यंतद्धि न समवायिकारणं समवायानभ्युपगमात् नापि गुणाश्रयः ब्रह्मणो निर्गुणत्वस्योक्तत्वादित्यर्थः। ननु
त्वरणाः कार्यगतगुणागीकारात्र निर्गुणत्वक्षतिविरोधः तत्राकाशवत्त्वस्य निरूपद्रव्यस्यापि प्रतिबिंबतामिति वा व्यंतत्राद्यमतनक्षत्रादेरेव रूपितः
प्रतिबिंबितत्वसंभवेन नीरूपाकाशप्रतिबिंबस्यासंप्रतिपन्नत्वादित्यत आह एकधेति। तत्पदार्थं निरूपणमुपसंहरति। तत इदं वमिति। अविद्या
प्रतिबिंब इति। एकैवाविद्या अजामेकामित्यादि श्रुतिः। न वेदेमायाभिरिति बहुवचनविरोधः तस्यान्तर्हिततत्त्वक्तिभेदपरत्वेनव्याख्यातत्वात्।
तथा चाविद्योपाधेरेकत्वात्तत्प्रतिबिंबलक्षणो जीव एक इत्यर्थः जीवैकत्वे च संप्रदायाध्वनाऽस्थितामित्येतावन्नैव तत्पक्षोऽपन्यस्तः। न त्व रामा०
यं पक्षोऽयुक्तः तथा हि एकजीववादे अविद्याया एकत्वेन एकस्य मुक्तत्वेन रदानीमपवानुपलंभायत्तेः। एवं मुक्त्यभावे वासद्देवादिमुक्ति १२१

पतिपादकबहुवाक्यविरोधाद्धो महे वादीनामुत्पन्नब्रह्मसाक्षात्काराणामप्यभक्तौऽर्वाचीनानामाचारद्वाते बलात्तीद्धिपेद्वे बक्रीचतो वारिधी
रेव कोष्टतित्यायेन मुक्तिर्दृरोत्सारितास्यात्। न चैवं विवरणाचार्ये जीवैक्योक्तेस्तद्विरोध इति वाच्यं तदुक्तजीवपदं प्रतिपाद्य एकएवेति शा
स्त्रदृष्टजीवैक्यपरत्वात्। अन्यथा तद्ववनस्य लोकसिद्धजीवभेदप्रतिबोधकत्वे अनंतजीवनिर्भासास्य दृमेकारसंबंधस्तत्यहंकारटीकायामपसप
द्राचार्यैर्जीवभेदस्याभिधानात्तद्विरोधापत्तेः। अत एव विवरणाचार्यैः शारीरकन्यायसंग्रहे ग्रंथांतरे रेवताक्षिकरणेतद्योपादेवानांप्रत्य
सुव्रतसएवतदं भवतत्तथा ऋषीणां तथा मनुष्याणामिति वाक्योदाहरणेन यस्यक्षानंतस्यैव मुक्तिरित्युक्तं। अत एव च यावदधिकार
मवस्थितिराधिकारिकाणामित्यत्र वसिष्ठादीनं ब्रह्मज्ञानि नउद्दाहृत्य तेषां यो रोहित्याद्यधिकारलक्षणप्रारब्धपर्यंतमवस्थानेव अज्ञानि
नमद्दाहृत्यते षायो हित्याद्यधिकारलक्षणप्रारब्धपर्यंतमवस्थानंततेऊर्ध्वं मुक्तिरित्युक्तं। तदेतत्पारमर्षीसूत्रेभोगेजलितरेक्षयमित्वासं
पद्यंत इति। तस्मादुक्तिस्तत्रसम्मतिन्यायाध्यविरोधात्। जीवैकत्वप्रवादो पनादर्तव्यः परीक्षकैः। जीवैकत्वमनेन जीवस्य लक्षणमु
क्तोतद्दनेकत्वमतेमतद्व्यक्षणमाह। अनेकतीववादे त्विति। अंतः करणे प्रतिबिंब एव जीवः न त्वविद्यावच्छिन्न इत्यर्थः। तदुपाधे
रेकत्वेन जीवनानात्वानुपपत्तेः नन्वविद्यावच्छिन्नो जीवः स च नानैव मायाभिरितिश्रुत्या तदुपाधेरनेकत्वावगमात्। अजामि

त्येकवचनश्रवणेरेकंवनमितिवत्समुदायाभिप्रायत्वादितिचेन्न।कार्योपाधिरयंजीवइतिस्मृतिविरोधात्।किंचस्वप्नमपितोभवतीत्यादि
श्रुतौसुषुप्तौब्रह्मणायोपाधिकोलयःश्रूयतेजीवस्य।अविद्योपाधिकत्वेतद्घटनंनस्यात्।अविद्यायास्तदाविनाशाभावात्।अपिचजीवस्यो
त्क्रांतिगत्यागतयोनोपपद्येरन्।अविद्यायाव्यापकत्वेनतदवच्छिन्नस्यगत्याद्यनुपपत्तेः।उपाधेःप्रतिबिंबपक्षपातित्वान्नक्तादोषाः
प्रतिबिंबवदवर्ततइत्युक्तंकेनदोषाउत्पाद्यकांक्षायामाहसर्वेनि।अत्रवस्थात्रयवानित्युपलक्षणं।तुरीयनामकावस्थांतरमादायाव
स्थाचतुष्टयवानितिद्रष्टव्यं।नचएकएवात्मामंतव्योजाग्रत्स्वप्नसुषुप्तिष्वित्यत्रामृतबिंदूपनिषद्वचनविरोधः।तस्यावस्थांतरोपलक्ष
णार्थत्वात्।जाग्रत्स्वप्नसुषुप्तिष्वित्यत्रामृतबिंदूपनिषद्वचनविरोधः।तस्यावस्थांतरोपलक्षणार्थत्वात्।जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं
यत्प्रकाशतेअवस्थाचतुष्टयवानितिकाशातइतिकैवल्योपनिषदादिपदेनतस्याभिधानात्।सचात्मोपनिषदिपोयोविज्ञानघनउक्तोमनप्रा
णादृहतीत्युपक्रम्यजागरितंस्वप्नंसुषुप्तंतुरीयंचेतितुरीयपदेनावस्थांतराभिधानात्।जाग्रत्स्वप्नःसुषुप्तिस्तुरीयमितिचतुर्विधाव
स्थाइतिशारीरकोपनिषदिस्पष्टमेवावस्थाचातुर्विध्यस्योक्तत्वाच्च।नचलक्षणात:सुषुप्त्यादाविवीतभावइतिवाच्यं।श्रुतिसिद्धविल रामः
क्षणावस्थांतरानुरोधेनतत्र्यादृत्रसुषुप्त्यादिलक्षणस्यसुषुप्त्यादिव्यावृत्त्यावस्थांतरलक्षणस्यवावश्यकल्पनीयत्वात्।तापमाण १२२

साध्यस्यलक्षणानोनातिपर्ययाद्योगात्।नचैवंमूर्छामरणाद्यांषड्विधास्फुरवस्थाइतिवाच्यंतयोरवस्थांतरत्वेप्रमाणाभावादितिदिक्।तत्रजा
ग्रदवस्थांनिरूपयति।तत्रेति।इंद्रियजन्येति।इंद्रियजन्यज्ञानोपलक्षितकालोजाग्रदित्यर्थः।तेनजाग्रतिस्वरूपाद्यनुभवकालेत्रोदासीन्यकाले
वततदिदिशिषत्वाभावान्नासंभवः।इंद्रियपदव्यावर्त्यमाहावस्थांतरइति।सुषुप्त्यादावित्यर्थः।नचैवमपिस्वप्नेतिव्याप्तिः।तत्रेंद्रियसत्वेपितद्व्या
पारोपरमादितिभावः।ननुसुषुप्तावविद्याविषयसद्भावपक्षेतत्रातिव्याप्तिरित्याशंक्यकिमविद्यावृत्तिमादायेतत्रातिव्याप्तिःउतस्वरूपज्ञानमा
दायनाद्यः।जाग्रतिजायमानबाह्यगोचरांतःकरणवृत्तेरेवेंद्रियजन्यत्वेनसर्वोपरमलक्षणसुषुप्तिकालवृत्त्यविद्यावृत्तेस्तदजन्यत्वाभा
वादित्याह।इंद्रियजन्यज्ञानेचेति।द्वितीयंदूषयति।स्वरूपज्ञानस्येतिननुनिःप्रयोजनेयमंतःकरणवृत्तिरतोनापेक्ष्यास्यादित्यतआह।सा
क्षीति।ननुचैतन्यप्रकाशसंबंधेनैवघटादिस्फुरणोपपत्तेर्नावरणाभंगार्थावृत्तिरित्याशंक्यकिंशुद्धंचैतन्यंविषयावभासकंउतईश्वर
चैतन्यंजीवचैतन्यंवानाद्यःशास्त्रार्थप्रयोनिर्विकारत्वेनविषयाननभासकत्वात्।ननद्वितीयःकल्पितविंबभावस्यचैतन्यस्यविर्वि
कारत्वेनविषयानवभासकत्वात्।नद्विषयप्रकाशकत्वेतेनजीवस्यव्यावहारिकभेदेनमयावगतमितिघटसंबंधानवभासप्रसं
गात्।सर्वदासर्वविषयावभासापाताच्च।नतृतीयःअंतःकरणावच्छिन्नोजीवइतिपक्षेतस्यघटादिसंबंधाभावेनानवभासकत्वात्।अत्र

१२

वे.प.व्या विद्याप्रतिबिंबः सर्वगतो जीव इति पक्षे तस्यावभासकत्वमिति चेत्तत्राह तथाहीति। जीवरूपतयेति तदुपाध्योर्घटादिविषययोरेशस्थत्वादि
१२३ तिभावः। ननु घटाद्यावरकस्य मूलाज्ञानादत्यंतभेदे नानाज्ञानापत्तौ एकाज्ञानश्रुतिविरोध इत्याशंक्य तन्निद्विषयावरणस्य मूलाज्ञानग
तशक्तिभेदत्वान्नात्यंतभेद इत्याह। मूलाविद्येति। अत एवोक्तं विवरणाचार्यैः मूलाज्ञानस्यैवावस्थाभेदा रजतोपादाना
नीति। नन्वस्तु घटादिचैतन्यावारकमज्ञानं ततः किमित्यत आह एवं सतीति। तथापि कथमभाने लाघवेन चैतन्यस्यैव विषयावभासक
त्वादित्याशंक्य रूपप्रत्यक्षज्ञानसमये घटे तद्गतः परिमाणादिग्रहापत्यात्तन्निद्विषयावरणभंगविशिष्टचैतन्यस्यैव वाच्यतया गौरवस्या
दिग्रहापत्यात्तन्निद्विषयावरणभंगविशिष्टचैतन्यस्यैव वाच्यतया गौरवस्यापि प्रामाणिकत्वादित्याह। अनादृत्येति। ननु घटादिविषया
वरणावृत्त्यावरणावत्से साइह शाया मनिवर्त्यमावरणात्यादित्याशंक्य तद्वदेवेदानीमभानस्य संग इत्याह। तस्यवेति। नन्वावरणभंगस्यापि
चैतन्येनैवोपपत्तेर्न तद्वोधाहृत्तिरित्याशंक्य किं चैतन्यमात्रं तन्निवर्त्तकं विशिष्टचैतन्यं वानाद्य इत्याह तदंगजनकमिति। तद्भासकस्ये
ति। यद्यपि तत्त्वरणादिप्रकाशाकूशकस्याप्यत्नेः तत्राशोकेत्वदर्शनात्त्राभासकत्वनिवर्तकत्वयोर्विरोधः। तथापि घटस्फुरणात्पूर्वं तत्स रामा
त्वेपि तदावरणाभानस्यैव दर्शनेनान्वयव्यभिचारात्तन्निवर्त्तकमित्यत्र तात्पर्यं द्वितीयं दूषयति निपीतिवृत्तिविशेषस्येति याहवृत्तिर्यद्वि १२३

षयाप्रत्यक्षा सा तदावरणाभंगेतिकेत्यर्थः। ननु वृत्तिर्न निवर्तिकापतोता नमज्ञानस्य निवर्त्तकं मुख्यज्ञानस्यैव निवर्त्तकत्वाभ्युपगमादित्यत
आह। तदुपहितेति। अस्मिन्पक्षे तु वृत्तेरेव वेहकत्यानाविहृतिप्रयोजकत्वमिति बोध्यं। उपसंहरति। इत्यावरणाभिभवार्थेति। आवरणाभि
भवो नाम वितः प्रतिबिंबदत्यकेः आवरणशक्तिनाश इत्यन्ये तत्प्रतिबंधरूपपरे खद्योतादिप्रकाशेमहांधकारस्येव अज्ञानस्यैकदेशेनाश
इत्यन्ये तत्प्रतिबंधरस्यपरे खद्योतादिप्रकाशेमहांधकारस्येव अज्ञानस्यैकदेशेनाशः इति संप्रदायविदः। तदुक्तं तत्त्वदीपने प्रतिकर्मव्य
वस्थायामावरणाभिभवशब्देनावच्छिन्नात्मानानिवृत्तिरिति जीवपादयति। तत्रेति नन्वपरिच्छिन्नत्वपक्षे जीवस्याविद्योपाधिकत्सकलसंयो
गितयाकथंत। तत्संबंधार्थी वृत्तिरित्याशंक्य संबंधसत्त्वेपि घटादिभानप्रयोजकसंबंधीभावान्तदर्थी वृत्तिरित्याशयेनाह संवेति। आशयम
द्वितीयं शिरस्यति। असंगत्वेति। असंगोनहि सत्पत इत्यादिश्रुत्यापारमार्थिकप्रपंचसंबंधनिषेधावगमादित्यर्थः। संबंधोनस्या
दिति। पारमार्थिक इति शेषः स्वाशयमुद्घाटयति। नहीति। ननु घटादिस्फुरणप्रयोजकोनसंयोगोतिप्रसंगात्। नापि समवायः अ
नभ्युपगमात्। अभ्युपगमेवा तस्यानित्यत्वादित्यात आह सवेति। ध्येयेति। जीवस्य घटादिभासकत्वे तद्दोलारदृत्तमुमहिता
त्वेतद्भास्यत्वे घटादेस्तदुपाधिवृत्तिविषयत्वं प्रयोजकमित्यर्थः। ननु चैतन्यवद्वृत्तिरपि घटादिप्रकाशस्वभावा तर्हि वास्तु घं

वे.प.व्या १२८ रं प्रकाशिका । किं चैतत्पक्षेनुज्ञानात्मिकान्तर्हिं वृत्तिर्हि नेवत पाटवादेरावरणापनेत्री रित्याशंक्य सवित्तर्कि करणस्य हर्षशासंबंधेन वाच्य । छां
तः करणसंबंधाच्चैतन्यस्य विषयप्रकाशकत्वमुपपद्यते इत्यत आह । तथा हीति । न हि घटादेः स्वच्छतया न वभासकत्वे विषयस्यापरोक्षस्यात्वे भि
व्यंजकत्वाभ्युपगमो विरुध्यते इत्यत आह ॥ स्वाकारवृत्तौ चैतन्यमभिव्यनक्तीत्यत्र घटादिकमित्यनुषंगः ननु प्रस्य स्वच्छतान्तस्थे वांतः
करणस्य व्यंजकत्वानंतरं संयोगिनोपि विषयस्येत्यत आह । इदं चेति । ननु घटादेर्न चैतन्याभिव्यंजकत्वं इंद्रियादेरेव साक्षात्कारकरणत्वे
नव्यंजकत्वात् । न वा लोके वृत्त्यावच्छिन्नचैतन्यगोचरज्ञानलक्षणमनोनिर्वर्तकतया विषयस्य व्यंजकत्वमिति वाच्यं । इत्थं रेखावरणनिवर्त
कत्वेनोक्तत्वं हि त्यागाशंक्याह घटादेरिति । ननु इन्द्रियविषयस्य घटादेः कथं हेतिसंयोगादिव आह अभिव्यंजकत्वमिति वाच्यं लाघवेनेन्द्रियसंबंधस्य
वेतस्त्यंयोजकत्वोपपत्तिरित्यत आह एवं हि विधेतिः । अन्यथा सबंधमात्रस्य चैतन्याभिव्यंजकत्वे हेत्रे र यपरोक्षस्थलेव हि निर्गमनवैयर्थ्यापत्तेरि
तिभावः किंचतत्संबंधमात्रस्य प्रयोजकत्वेपरोक्षस्थलेवह्न्यादेरपि इन्द्रियविषयनपातत्संबंधित्वेनापरोक्षत्वापत्तिः । इन्द्रियसंयोगस्य प्रयोजकत्वे तु
नायं दोष इत्याह । परोक्षेति । ननु संतंधस्य प्रयोजकत्वे वसाद्देरपि व्यंजकत्वे पि नापरोक्षत्वं संविद भिन्नत्वस्य विषयप्रत्यक्षलक्षणत्वेनोक्त रामा०
स्य तत्राभावादित्यत आह । एतन्मतेइति । जीवस्य परिच्छिन्नत्वेपि घटाद्यधिष्ठानचैतन्याभिन्नत्वेन स्वान्तःसंबंधिनया कथं ज्ञेतः संवेद्यत्वमिता १२६

शंक्य किं जीवस्य स्वतंत्रावघटाद्यधिष्ठानत्वात्तत्रैव तत्संवेद्यायेस्यात्तदित्युपादाय नन्वैतन्याभेदाद्धातत्राद्येदूषयति तस्य चेत हिं चैतन्यामात्रेणोपादानेस्यात् । निष्क
लंकत्वश्रुतिविरोधेन अनुद्दचैतन्यस्याप्युपादानत्वादिति शंकते किं त्विति । कल्पित इति । बिंबभावमीश्वरपरत्वाव्यंग्ये लैव संगदुपादानमित्याह व्रस्तेव
ति द्वितीये तत्कल्पितभेदस्य जीवस्य तदुपादानचैतन्याभेदो न हि तद्विना संभवतीति हेतुत्वेन संबद्धायेस्यादुर्वारेत्याह । तथा चेति । इति प्रयोज
नमुपसंहरत्येवमिति । एवमिंद्रियजन्यांतःकरणवृत्तेरेव स्थानात्रयाहिति जाग्रदवस्थां निरूप्य स्वप्नावस्थां निरूपयति । इंद्रियातन्येति । पद्यान
स्वप्नज्ञानमिंद्रियाजन्यं तत्प्राप्यादिति भस्तारसाक्षात्तदविद्योपादानो हेतिरविद्याहत्तिरविद्यावृत्तिः सा च नित्यसुखगोचरा अविद्यागोचरा चेत्य ।
त एव सुषुप्तोत्थितानुभवः सुखमहमस्वाप्सं न किंचिदवेदिषमिति तन्न वस्थासुषुप्तिरिति विवक्षितं तेन घटमहं न जानामीत्यविद्यागोचरायार
परयात इत्याह । नांतःकरणवृत्तिमादाय नायत्स्वप्नयोर्नाशिव्याप्तिरित्याह । जाग्रदिति । रामानुजादिमतं दूषयत्येतेनेति । चैतन्यात्मकस्य जीवस्याविकिंय
रमाणिकमाणुत्वमौपाधिकं वानायः आद्य द्वितीयत्वादिश्रुतिविरोधेनतद्योगात्वाद्वितयः जीवस्याविद्याधिकत्वयक्तेनतद्देवव्यापकत्वात्तरं अंतः
करणोपाधित्वेवमध्यमपरिमाणत्वात् । उपाधिपरिमाणसमानपरिमाणस्य घटाद्यवच्छिन्नाकाशोहि दृष्टान्तात् । बुद्धेर्गुणेनात्मगुणेन प्रमात्रत्वेप्यौपाधिकम
रिच्छेदेश्रवणाच्चा । काचिदणुत्वश्रवणस्पदड्ढे यवस्त्वभिप्रायात्वात् । अन्यथा । आरेगारणीयानिति श्रवणाहात्मोर्णुरणोरणुः स्यात् । अणुत्वेच
सत्यस्तत्वानुपपत्तेः शरीरव्यापिसुखाद्यननुभवानापत्तेश्च । न चात्मत्वमणुद्रव्यवृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातित्वात्पृथिवीत्ववदित्यनुमानेनात्म

वे·प·व्या·
१२५

राणुत्वपक्षे मनस्त्वेव्याभिचारात्। अनात्मदृष्टान्तेत्वस्योपाधित्वात्। आत्मत्वं नाणुनिष्ठम् आत्मत्वाद् ईश्वरत्ववदित्यनुयोगाच्च। ननु स्मात्रा राणु
जीवश्च इति श्रुतिः। जीवस्याणुत्वस्य हि कंकाल्पितं धर्मी निरूप्य संप्रतितस्य यारमार्थिकं रूपं निरूपयति स वेतित्र इह हारण्ये प्रतिषद्वचनं समाराध्यति
। स्वप्नावस्थामिति। नवायं ग्रामः परमात्मपरः सूक्ष्मनेतरत्वा व्याविरोधात्। तथाहि आत्मैवास्य ज्योतिरित्युक्त्वोक्तं कतम आत्मेति यो यं विज्ञानमयः
प्राणेषु हृद्यन्तर्ज्योतिः स्वयं पुरुषो ज्ञायमानः शरीरमभिसंपद्यमानः पाप्मभिः संसृज्यते। स उत्क्रामन्म्रियमाणा इति चोक्ता उत्तरस्वप्नं विवृत्य स्व
यंनिर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिरित्यादिना स्वप्नकाशत्वस्यैव स्वप्नावस्थामुपदर्श्य पुनर्विज्ञानी जीवात्मानमेव स्वप्न सुषु
प्त्याद्यवस्थाया सा स्वयंज्योतिरात्मा स्वरूपमित्यर्थः। हेऽशरीरत्तिवत्सुसुप्तचैतन्यहेत्वभिप्रेत्याह। स्वप्नावस्थामधिकृत्येति। किं च जीवः स्वप्र
काशश्चिद्रूपत्वाच्चिदवत्। स्वप्रकाशत्वं च सजातीयप्रकाशाप्रकाश्यत्वे न च विरुद्धत्वमसिद्धं तस्य प्रकाशात्वादित्याह। अनुभवरूप इति योप
विज्ञानघन इत्यादिश्रुतिरादि ग्राह्या किं च घटज्ञानयोः संबंध आत्मनिष्ठ ज्ञाननिष्ठत्वात् सवावत्। अपि चात्मा ज्ञानरूपः आत्मान्यानि विंशयन्य
त्वाज्ज्ञानवत्। न चाप्रयोजकता आत्मा यदि यावत्स्वविष्टितिसमानकालीनज्ञानाविषयत्वे सति ज्ञानरूपो न स्यात्। स्वनिष्ठप्रकारकस्ववि
षयकसंशयादिविषयः स्यादयदिव दृष्टितिबाधकतर्कसत्त्वान्तेन अत्र जीवः स्वप्रकाशः विषयप्रतियोगिनिरूपणान्नेन रविषयनिरूपणात्प्रति ना
तिनानीतेत्र श्रुतेति। महावाक्येति। सत्यं ज्ञानमनन्तं ब्रह्म। आहिवाक्य अवान्तरवाक्यं तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा ब्रह्मेत्यादिवाक्यं महा रामा

तृतीय १२५

। ननु प्रत्यक्षस्यान्येषु तत्प्रचलत्वे न बाधकमित्यत आह। अन्यथेति। तर्हि भेदप्रत्यक्षस्याप्रामाण्यकल्पनमेव भेदप्रामाण्यापेक्षाधिकमि
त्यत आह। अन्यथेति। तर्हि भेदप्रत्यक्षस्याप्रामाण्यं नरशृंगाचानुमानवदागमबाधादित्याह। अत एवेति। भेदग्राहि श्रुतिस्मृतिविरोधादिति
स्यादिति। नाप्यागमान्तरेति। ननु द्वा सुपर्णा इत्यादिवाक्यप्रतीयमानभेदेदपरमेवास्तु बाधकाभावादित्यानोत्क्षणाद्वस्यातात्पर्यपरत्वात् भेदस्य
च प्रत्यक्षादिप्रमाणावगतत्वात् न तत्परं त्वद्वत्याह। लोकसिद्धेति। ननु तत्त्वमस्यादिवाक्यमपि नाभेदपरं प्रशस्तादिवाक्यवत्र स्योपच
रितार्थत्वेनोक्तत्वादित्याशंक्य किं बाधकसत्त्वाद् भेदपरत्वाभावमाहत्यर्थस्य आह। काभावाहानामः प्रशस्तस्य पत्तत्तत्त्वे बा
धकवद्भेदे बाधकाभावात्। न च प्रशस्तादिवाक्यवत्स्तुतिपरत्वं तात्पर्यबाधकं प्रकृतं प्रहरतीति विधिन्ते पतया वगत
त्वेन प्रशस्तस्य स्तुतिविषयत्वेऽपि जीवेश्वरयोर्विध्यन्वयादर्शनेन स्तुतिविषयत्वायोगात्। नाहमिति यद्वत्याह उपक्रमे
ति। अर्थापत्तिमाशंक्य निराकरोति। न चेति हं प्रदायमतनाह। लक्ष्यस्वरूपेति न न्यस्तुवाक्यस्य लक्ष्यस्वरूपमात्र
परत्वांततः किमित्यत आह। त एवेति। ननु वेदान्तेन ब्रह्मपराः पदानां कार्यान्वितत्वात्र न्युत्पत्तेन कार्यपरत्वेनैव प्रामा
ण्यवधारणात्तथा चादित्यो ब्रह्मेतिवत्तत्त्वमसीत्यभेदोपासनापरमित्याशंक्य सिद्धेऽपि संगतिग्रहस्योक्तत्वादिति

१

१२६ घपनिान्वेति। किंच नाभेदोपासनात्र विधेयाऽपास्तीत्यश्रवणात्। तत्त्वमस्यादेस्तद्वाक्यविहितावितिब्रह्मविद्याया एव श्रव
णाच्च। किंच तत्त्वमस्यादिवाक्यं नोपासनापरं। अभयं वै जनक प्राप्तोसि। तदात्मानमेवावेत्। अहं ब्रह्मास्मीति स्वरूपार्थश्रुत्य
नुसारेण स्वरूपार्थश्रुतेरपि व्याख्यानौचित्यात्। अत एव तत्र चतुर्द्धीकरणीतीति च तं स्वरूपार्थकवचनान्तरानुसारेण दायविषयं
व्याख्यातं। न चाहं ब्रह्मेत्यत्रापि भेदोपासनमिति युक्तं। अवेदि श्रुतिविरोधात्। आत्मानं चेद्विजानीयादहमस्मीति पूरुषः। कि
मिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्। तत्र को मोहः कः शोक एकत्वमनुपश्यत इत्येकत्वज्ञानस्यैव श्रुतौ पुरुषार्थत्वप्रति
पादनाच्च। जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधात्प्रमुच्यते सर्वे च सकलं ज्ञातं भवि
सर्वं प्रतिष्ठितं भवति सर्वं लयं यान्ति यः। इद्ब्रह्माद्वयमस्म्यहमिति कैवल्योपनिषद्वचनाच्च। यथा नदीनदा लोके सागरेणैक
तामियात्तद्वदात्मा क्षरेणासौ निष्कले नैकतामियादिति कूर्मपुराणवचनाच्च। यदएवलभ्रनरावारव्यमश्रमिपमतराणे कांतद्ध
स्ताहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवमिति विश्वामित्रस्मृतेश्च। अद्वैतमेचयस्वब्रह्मवाहदेतो ख्यमच्चर्या इति स्यात्रिस्त्रितो मत्कोठ राम
द्वएवान्यथा भवदिति वररुचिवचनाच्च। अत्रात्मव्यतिरेकाद्वितीयं यो न पश्यति ब्रह्मास्म्यहं ततः स एवेह दक्षप क्षपदात्त्वतद्दति १२६

दक्षस्मृतेश्च। सर्वभूतान्तरस्यापि नित्यशुद्धचिदात्मनः प्रत्यक्चैतन्यरूपाय पुराणवचनानि चाध्येतव्यानि। तस्मात्सिद्धं तत्त्वमस्यादि
वाक्यस्य जीवपरैक्यपरत्वात् तदेतत्सर्वमभिप्रेत्योपसंहरत्येवमिति॥ ॥इति धर्मराजाध्वरीन्द्रात्मज श्रीरामकृष्णाध्वरिविर
चिते वेदांतशिखामणौ विषयपरिच्छेदः॥ ॥एवं ज्ञातमिति। एवमनेन रूपेणाखण्डितत्वेनावगतं नत्वेवं वर्तते तेन रूपे
णाच प्रयोजनमित्यर्थः॥ अनागतत्सुखत्वादिकं च स्वरूपेणेति तथा सुखत्वेनानुमानात् ज्ञातं तेन रूपेण श्रुतिसुखं भूपा
दिति पंश्रपुत्रादिकं चिषस्याधनत्वेनावगतमिच्छाविषय इति तन्नरूपेण प्रयोजनं तत्वाच्च सुखादेर्गुणत्वादिना व्याप्तो
सुखत्वादिनाच्चात्मन्ति बाधदर्शायां चेच्छाविरहेपि न दोषः। न पश्वपुत्रादौ नांकपं स्वरूपत्निलंपरं यशासंवेधतत्वरूपत्रि
त्वे प्रति प्रसंगादिति वाच्यं। स्वलक्षणसंवेधतत्वरूपत्वाभ्युपगमात्। स्वरूपसंवेधस्यापि साक्षात्संवेधत्वात् द्वैवि
ध्यमेवाह॥ मुख्यमिति। पर्वाश्रवणरूपेणावगतं सदिष्यमाणं तन्मुख्यप्रयोजनं। अप्रतिरिक्तधर्मत्वेनापेक्षमि
ष्यमाणं गौणमित्यर्थः। तदुभयं क्रमेणोदाहरति। तत्रेति। सिद्धान्ते च सुखस्य द्वैविध्यमित्याह। सुखं चेति। तत्र निरत्सु
खं सातिशयमित्याह। तत्र सातिशयेति। पश्चाकाचिदंतःकरणवृत्तिः सत्त्वगुणतन्मतपावेतन्यातत्तानीप्रतिबिं

वे॰प॰व्या
१२७

विषयग्राहित्वेनसुखानंनवाऽतादृशीवृत्तिस्तत्तदुत्तानंदलेशप्रतिबिंबग्राहकत्वात्सुखमितिव्यपदिश्यते।तस्यांसुखत्वलक्षणायांवृत्तावानंदप्रव्यक्ति
रेकाभ्यासात्कुंदनवनितादिविषयसंबंधोहेतुः।अतएवतत्तारतम्यात्सुखतारतम्यं।अतएवचास्मदादिसुखाद्राजसुखमुत्कृष्टं
तस्मात्सार्वभौमसुखमुत्कृष्टतरंततश्चेंद्रादिसुखमुत्कृष्टतममिति।ननुप्रत्यानंदप्रतिबिंबग्राहित्वादंतःकरणवृत्तिरेवसुखंतदा
संनिहितपरिपूर्णानंदस्यापिग्रहणसंभवेनसर्वमपिसुखमेकरूपंस्यादितिचेन्नपरिपूर्णस्यानवच्छिन्नानंदमूलाविद्यावृतत्वेने
दानींतदग्रहणयोगात्।नन्वस्तुनिरतिशयानंदात्मकंब्रह्मततःकिमित्यतआह।आनंदात्मकेति।ननुनब्रह्मणावाप्तिर्मोक्षस्तस्याःसंसा
रदशायामपिभावान्ननिवृत्तशोकःपरिपूर्णानंदोनप्राप्तिरितिचेन्नत्वयावश्यकत्वात्सैवमुक्तिरित्यतस्तथैवप्रशांतरमाहशोकनिवृत्ति
रिति।अनर्थहेत्वविद्यानिवृत्तिरित्यर्थः।क्रमेणप्रमाणमाह।तरतिशोकमित्यत्रशोकहेतुत्वात्तत्पदेनाविद्योक्तातरणंचात्र
तरतिब्रह्महत्यामितिवन्निवृत्तिरूपंविवक्षितंनतुसेतुंतरतीतिवत्शोकस्यामूर्तत्वाभावादितिध्येयं।लोकांतरप्राप्तिरेवमुक्तिरितिनिकाः
कल्पयंतीतान्प्रत्याहनत्विति।लोकांतरप्राप्तेःसुखदुःखाभावान्यतरत्वाभावात्स्वतःप्रयोजनत्वायानंदादिमित्यस्याभ्युपगमेलोकांतरगमनवै
यर्थ्यात्।ननुनलोकांतरावाप्तिःस्वतोमोक्षःकिंतुतत्रत्यवैषयिकानंदद्वारा।सचतत्रैवेतिनलोकांतरगमनवैयर्थ्यमितिचेन्नकिंसैवमु राम
१२७

क्तिरुततत्रत्यवैषयिकानंदः।नाद्यःआवश्यकत्वान्मुख्यप्रयोजनत्वाच्चतस्यैवमुक्तित्वौचित्यात्।अन्यथामुक्तेःस्वतःपुरुषार्थत्वाभावप्रसंगात्
द्वितीयंदत्याह।तज्जन्येति।वैषयिकानंदस्यमुक्तित्वेतस्यस्वरूपेणजन्यतयास्वर्गादिवदनित्यत्वंस्यादित्याहतस्येति।किंचविषयजन्यानं
देनमोक्षत्वेतस्यस्वर्गादिवत्सातिशयत्वापत्तौमोक्षस्यपरमपुरुषार्थत्वाभावप्रसंगात्।किंचवैषयिकानंदस्यमुक्तित्वेमुक्तिदशायांभे
दापत्तौपत्नीत्वस्यसर्वमात्मैवाभूत्।यावन्मोक्षंतुभेदःस्याज्जीवस्यचपरस्यचततःपरंनभेदोस्तिभेदहेतोरभावतः॥विभेदजनकेज्ञानेनाश
मात्यंतिकंगते।आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यतीत्यादिवचनविरोधापत्तिः।किंचमुक्तिदशायांशरीराभावेनवैषयिकानंदानुपप
त्तेः।तस्यशरीरजन्यत्वनियमात्।अतएवस्वर्गशरीरकल्पना।नचात्रापितत्कल्प्यतइतियुक्तं।अशरीरंवावसंतमित्यादिश्रुतिविरोधात्।
किंचनब्रह्मविदांलोकांतरगमनमस्ति।नतस्यप्राणाउत्क्रामंति।अत्रैवसमवलीयंतइतिश्रुतेः।नवार्चिरादिनागमनंश्रूयतइ
ति।तद्वचनस्यसगुणोपासकविषयत्वेनब्रह्मविद्गमनस्यानभिधानात्।अतएवाब्रह्मविदामपिपंचाग्निविद्योपासकानांअर्चिरादि
नागमनं।नचैवंब्रह्मविदांतदनभ्युपगतावेतेनप्रतिपद्यमानाइमंमानवमावर्तंनावर्तंतइतिअर्चिरादिनागतानांअपुनरा
वृत्तिश्रवणाद्विरुध्येतेतिवाच्यं।सगुणोपासकानांअर्चिरादिनागतानांआब्रह्मवरोमाणविधपयापमित्यादिश्रुत्यवगतनिरस्तसमस्त

दोषाणां ब्रह्मलोकस्यैव संपादित्वश्रवणादिसाधनानां तत्रैव ब्रह्मसाक्षात्कारसंपादनेन ब्रह्मणा सह परममुक्त्यभ्युपगमेनाविरोधात्। किं दोषा-
त्। किंच लोकस्य प्रलयेपि विनाशो स्यादेव सोम्येदमग्र आसीदित्यादिश्रुतिविरोधः। विनाशेमुक्तिशास्त्रवैयर्थ्यं अपि च वैकुंठादिप्राप्तानां
मुक्तत्वे जयविजयादीनां भगवद्द्वारिकाणां मुनिशापादिना राक्षसादिदेहप्राप्तिर्न स्यात्। न चार्चिरामनस्य परंपरया आपुनरावृत्ति-
हेतुत्वेन जयविजयादेः पतस्य वमतेपि नावर्त्तते इति वाच्यं। न हि जयविजयावर्चिरादिना ब्रह्मलोकं गतौ। किं तु वैकुंठाख्यं लोकांतरं
न हि तस्यैव ब्रह्मलोकत्वं। प्रजापतेः सभां वेश्म प्रतिपद्य इति वाक्यशेषेण कार्यब्रह्माधिष्ठितदेशविशेषस्यैव ब्रह्मलोकपदेनाभि-
धानात्। अपि च ब्रह्मलैव मन्वंति ब्रह्मैव सन् ब्रह्माप्येतीत्यादिश्रुतयोर्वैषयिकानंदस्य सोपाधित्वेन सामंजस्येनोपपद्येतन्। अत एव मा-
मुपेत्य तु कौंतेय पुनर्जन्म न विद्यत इति स्पष्टमेव स्वस्य माप्यत्वं भगवतैवोक्तं। एकाकिनः सदा ब्रह्मध्यायिनो योगिनो हि ये। तेषां
तत्परमं स्थानं यद्वै पश्यंति सूरयः इति विष्णुपुराणे परस्थानपदेन ब्रह्मस्वरूपमेवोक्तं। एतेन तांत्रिकाणां मुक्तौ नारायणकल्पनम-
पास्तं। ब्रह्मलोकेषु आनंदतृप्तो वा विशेषाभावात्तस्मान्निरस्तसमस्तक्लेशमभिव्यक्तपरिपूर्णानंदमात्मानमित्त्रं ब्रह्मैव मोक्ष इति
श्रुतिस्मृतीतिहासपुराणन्यायकोविदैरभ्युपगंतव्यमिति संक्षेपः। नन्वानंदावाप्तिरनर्थहेतुत्वविद्यानिवृत्तिर्वा मोक्ष इत्यभ्युपगम्य

तस्य च मतेपि तदुभयं सादि अनादि वा आद्ये कृतकत्वेनानित्यत्वापत्तौ अपुनरावृत्तिश्रुतिविरोधः। द्वितीये मोक्षस्यासिद्धत्वगर्भसाध्यत्वा-
भावेन तत्साधनश्रवणादौ प्रवृत्तिर्न स्यादिति तांत्रिकः परिचोदयति। नान्विति उभयविधस्यापि मोक्षस्य ब्रह्मस्वरूपतयानादित्वे-
पि न प्रवृत्त्यनुपपत्तिरित्याह। सिद्धस्यैवेति। असिद्धत्वभ्रमेणेति। लाघवेनेष्टसाधनताज्ञानस्य भ्रमप्रमासाधारण्यात्तत्साधन-
ताज्ञानमेव प्रवर्त्तकत्वमिति भावः। अनर्थनिवृत्तिरेव मुक्तिः सा च ब्रह्मस्वरूपातिरिक्ता तत्वज्ञानात्प्रागसिद्धैव अद्वैतश्रु-
तेश्चाभावाद्वैतपरत्वान्न तद्विरोध इति ये मन्यंते तेषां मतं दूषयत्यनर्थनिवृत्तिरपीति। आनंदलाभरूपा मुक्तिवदनर्थनिवृत्तिरपि ब्रह्म-
रूपैव अन्यथा अद्वैतश्रुतिविरोधात्। भावाद्वैतवादस्य च प्रक्रियामात्रत्वेनाप्रयुक्तत्वादिति भावः। ननु स्वस्य साध्यत्वेपि मुक्तेस्तत्सा-
धनत्वभ्रमात्कथंचिच्छ्रवणादौ प्रवृत्तिः तथापि कथं पुरुषार्थत्वं साध्यस्यैव लोके पुरुषार्थत्वस्य व्याप्यं व्यापकं वा नाद्यः व्याप्याभावेपि
व्यापकसत्वविरोधाभावात् दुःखध्वंसे व्यभिचाराच्च। न द्वितीयः प्राप्तेष्टपरिहृतानिष्टप्राप्तपरिहारयोरसाध्यत्वेन व्यभिचारादित्या-
ह लोके पीति। नन्वसिद्धत्वभ्रमाच्छ्रवणादौ प्रवृत्तस्य शाब्दजन्यपरोक्षसिद्धत्वतामसाक्षात्कथं तद्भ्रमनिवृत्तिः कथं वा तन्मूलाविद्यानि-
वृत्तिः तदुभयस्य विरोधिसाक्षात्कारसाध्यत्वादिति चेन्न तत्त्वमस्यादिवाक्यजन्यज्ञानस्यापरोक्षत्वाभ्युपगमात्। अतएव तद

व.प.व्या.
१२९

त्वंपदार्थं तमाह। यथेति हिरण्यपदार्थ्यासत्त्वं मजंतइत्यादिश्रुत्या मोक्षस्य कर्मसाध्यत्वावगमात्। ज्ञानकर्मणोः समुच्चयपक्षेपि एवं तिता त्रिशरावधे
।सवेति। नात्यद्भिति। तथाच मुक्ताबुपामांतरमप्रति बोधेन हिरण्यपदार्थ्यासत्त्वमित्यादेः प्रलयपर्यंतस्थापि स्वर्गादिफलाभिप्रायत्वात्। अत्र द
शपूर्णमासवज्ज्ञानकर्मणोः फले समुच्चयः। किंच मोक्षस्य कर्मजन्यापूर्वसाध्यत्वे स्वर्गादिवत्साक्षात्कारमात्रसाध्यत्वे तिशयिता
श्रपि कृताशरीरसंबंधश्च स्यात्। अपिचानंदाविर्भावो मोक्षः। आविर्भावश्चाविद्यानिवृत्तिः सा च शुक्तिरूप्यादिस्थले विरोधिसाक्षा
त्कारमात्रसाध्यत्वावधारणान्न कर्मसाध्येत्याह। ज्ञाननिवृत्तिरिति। नन्वेवमपि जीवपरैक्यज्ञानं न मुक्तिहेतुर्मानाभावात्। तत्त्वमसीति शोकम
त्मविदित्यादेश्च भेदज्ञानपक्षेपि उपपत्तेरित्याह। तत्त्वेति। ननु वाक्यजन्यज्ञानं नानर्थनिवर्तकं तस्य परोक्षत्वनियमादित्यत आह। त
त्वेति। तत्त्वमस्यादिवाक्यजन्यं ब्रह्माभेदज्ञानमपरोक्षरूपमेवेति तन्निवर्तकमित्यर्थः। ननु परोक्षजनकस्वभावाद्वाक्यात्कथमपरो
क्षधीरित्याशंक्याह। तत्त्वेति। तत्त्वमस्यादिवाक्यादिति। साक्षात्तिशेषः। तत्त्वमस्यादिवाक्यावगते ब्रह्मणि मनननिदिध्यासमजनि
तभावनाविपरीतभावनानिवृत्तिसहकृतादंतःकरणात्मस्य प्रमाणादेवापरोक्षज्ञानमुत्पद्यते। ननु वाक्यादित्याचार्यवाचस्पतिमि
श्रा व्याचक्षते तन्मतमाह। मननेति। ननु करणविशेषापत्तिकाय्यनि हि कुब्जवीजाद्यवाङ्कुरोत्पत्तिर्दृष्टा पूर्वेत्याशंक्य मत्यक्षपरिच्छेदोक्तमर्थं

राम
१२९

स्मारयति। तत्र पूर्वाचार्याणामिति। शब्दप्रमाणकं ज्ञानमपरोक्षमित्यत्र शास्त्रदृष्टिस्तत्र मुपोद्बलयति। अत एवेति। यतो वाक्यजन्य
ज्ञानमपरोक्षमतः शास्त्रदृष्ट्यादत्र परोक्षो वामदेववदित्यत्र सूत्रे शास्त्रीयार्दृष्टिरिति सूत्रस्यार्थः तत्त्वमस्यादिवाक्यजन्यमहंब्रह्मेति
ज्ञानं शास्त्रदृष्टिशब्देनोक्तमिति संबंधः। ननु यथा ब्रह्मदृष्टिरुत्कृष्टादित्यत्र दृष्टिशब्देनोपासना तथात्रापि सैव विवक्षिता नापि
रोक्षधीरित्याशंक्य प्रतर्दनाधिकरणसंग्रहेणादर्शयति। प्रतर्दनेति। अस्ति हि कौषीतकिब्राह्मणे प्रतिबर्दिवोदासिं प्रत~~र्दनो मातरमा~~
~~मामुपास्स्वे~~त्यनुर्दनाख्यापि कांप्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपपत्ते गाम युद्धेन च पौरुषेण चेत्या ज्ञातात्स्याश्रपते
स होवाच प्राणोस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्स्वेति। तत्र किं प्राणशब्देन वायुरभिधीयते उतेंद्र उत जीवः परं ब्रह्म वेति च
तुर्विध लिंगसंभवाद्वस्तुधर्मसंशये इदं शरीरं परिगृह्योत्थापयतीति वायुविकारप्राणलिंगस्य वक्तारं विजानीयादिति जी
वलिंगस्य मामेव विजानीयादिति इंद्रलिंगस्य आनंदोऽजरोऽमृत इत्यादि ब्रह्मलिंगानां च प्राबल्यदौर्बल्यविवेकाभावादनिर्णय
इति प्राप्ते जीवब्रह्मप्राणान्यामपरिणान्नोपास्याः नचैवं वाक्यभेदो दोषमावहति वाक्यार्थावगमस्य पदार्थपूर्वकत्वात्पदार्थना
त्रोक्तेन मार्गेणास्य वात्तं आत्तस्मादुपास्यभेदादुपासनात्रैविध्यमिति पूर्वपक्षे प्राप्ते इदमुच्यते॥ प्राणस्तथानुगमादिति। प्राण

शब्दवाच्यं ब्रह्मविषयं पौर्वापर्यालोचनया वाक्यस्य ब्रह्मपरत्वावगमात्। उपक्रमे हि तमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इति हित
तत्वेन प्राणाद्युपदिश्यते। तथोपसंहारेऽपि स आनंदोऽजरोऽमृत इत्यानंदत्वादिना। न चेदं ब्रह्मणोऽन्यत्संभवति। जीवप्राणलिंगान्नेति चेन्न
मुख्यप्राणेन नेतव्यत्वात्। अन्यथा हि प्रोक्तवाक्यानां हि संभवत्येकवाक्यत्वे वाक्यभेदः। तदाह। उपासात्रैविध्यादाश्रितत्वादिति। तस्मादनन्यथा
सिद्धब्रह्मलिंगानुसारतः एकवाक्यत्वाज्जीवप्राणलिंगोपपादनमिति। तस्मात्प्राणशब्दवाच्यं ब्रह्मैव तथा चेन्द्रप्रतर्दनाख्यायिकायां प्राणशब्दस्य
ब्रह्मपरत्वावगमात्तत्रस्थस्य हि शब्दस्योपासनापरत्वं किं तत्परीक्षा ज्ञानपरत्वं। अत एवोपक्रमगतं मामेव विजानीहीति वच
नसंगच्छत इति। ननु विषयविशेषबंधनस्य प्रत्यक्षलक्षणस्य वाक्यजन्यज्ञानेऽपि सत्त्वाद्वाक्यादपि सूत्रविरोधात्। आचा
र्यवाचस्पते तत्त्वमस्यादिवाक्योत्थज्ञाने परोक्षत्वोक्तिः इत्युक्तस्याशंकायामाह। अन्येषां त्विति करणविशेषेन्द्रियजन्यज्ञानत्वं ज्ञानानां
प्रत्यक्षत्वमित्यर्थः। प्रत्यक्षत्वस्य विषयविशेषोपाधित्वे सूक्ष्मवस्तुनि परोक्षत्वव्यवहारविरोधात्। अस्ति सूक्ष्मवस्तुनि जिज्ञासा
दीपरूपोऽस्य हि लिपिमिति पदकुर्वाणस्य पूर्वस्य विरस्यतु करणापाटवचतो नपश्यामीति व्यवहारदृष्ट्यापाह। एकोऽसि त्रिति। नन्विंद्रि
यजन्यत्वेन प्रत्यक्षत्वं मनसोऽनिंद्रियत्वेन सुखादिप्रत्यक्षप्रतीनावव्याप्तेरिंद्रियत्वे वानुमित्यादावतिव्याप्तेरित्याशंकायामनहीं द्रि

यत्तत्पत्वं प्रत्यक्षत्वं किं त्विंद्रियत्वेन तज्जन्यज्ञानत्वं। अनुमितिश्च मनस्त्वेन तज्जन्येति नातिव्याप्तिः एतन्मते च मनस इंद्रियत्वाभ्युपगमा
त्सुखादिप्रत्यक्षेऽव्याप्तिरित्यभिप्रेत्याह। तथा चेति। नन्वत्र यथा स्तुत्यौ निषेदे ब्रह्मसाक्षात्कारोपनिषदि प्रमाणं। नत्विह शंके अनर्थ
निवर्त्तका परोक्षप्रमितौ तत्त्वमस्यादिवाक्यं करणं कल्प्यते न च मनःकरणमिदानीमपि ब्रह्मसाक्षात्कारोपपत्तेरित्यत आह। ब्रह्मे
ति। मनसैवेति। प्रत्यक्षकारणत्वेन नस्य कृतत्वादिति भावः मम मते ब्रह्मसाक्षात्कारणत्वेन प्रमाणांतरं महत्त्वनस्यैवेति। तस्य मनो ग
म्य मनोगम्यत्वे बाधकमाशंक्य निराकरोति। नचैवमिति। अपूर्वस्य वेदबोधत्वे पितदुपत्ती अनुमानार्थापत्ती वेधत्वबदुपनिषदेव
वेऽपि ब्रह्मणो मननादिसंस्कृततदुपत्ती विमनोवेद्यत्वं न विरुद्धमित्याह। अस्य इत्युक्तेति। शास्त्रदृष्टिसूत्रविरोधमुद्धरति। शास्त्रेति
। कस्य न रूका तत्संप्रतिमा कृतदुक्तमिति। अनयोश्च पूर्वमतमेव प्रकृतं ग्रंथकृदभिमतपत्थाहि ननु ताव त्करणविशेषनिबंधनं
संवित्प्रत्यक्षत्वं मनसइंद्रियत्व निराकरणेन सुखादिप्रत्यक्षेऽव्याप्तेः किंतु प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमुक्तं।
सूक्ष्मवस्तुन्यसमर्थेंद्रियस्य संनिकर्षाभावेनांतःकरणस्य बहिर्निर्गमनाभावान्नोक्तदोषः तथा च ब्रह्मसाक्षात्कारे तत्त्वम
स्यादिवाक्यमेव करणं मनसैवानुद्रष्टव्यमिति श्रुतिश्च तत्सहकारित्वविषया अन्यथा मनःकरणककामिनीसाक्षात्कारवदज्ञान

सहकृततजन्यतयातस्यासमावापत्तेः मूलप्रमाणाद्बाध्यत्वात् मा मा एष मिलितचेतन्याविश्वरूपकत्वेनोपनिषद एवं दशामस्त्वमसीति वत्यमाणत्वोप
पत्तेः तथा च मनोगम्यत्वाभावश्रुतिरपि मुख्यार्थासमर्थिता भवतीति तत्र यज्ञादीनां श्रेयःप्रदीपं प्रिकल्पामनिवर्हणद्वारोपयोगाङ्ग
तिके चित्तशुद्धिः तत्वज्ञाने सति संचितस्य कर्मणो निवृत्तत्वेन मुक्तिप्रतिबंधकत्वायोगात् ब्रह्मस्वभावैकनाश्यत्वेन यज्ञादिनिव
र्हणीयत्वायोगात्। तस्मात्कर्मणां न मुक्तौ विनियोगः। किंतु पापनिवृत्तिद्वारा ब्रह्मसाक्षात्कारोत्पत्तावित्याह। तत्त्वेति तत्तत्समा
श्रमाह। एतमेवेति। नमेतमिति श्लोकेन साधनं तमात्मानं वेदानुवचनप्रवदानानाशकत्वपोभिविविदिषन्तीति दृष्टसाधनतया
वेदानुवचनादीनि विधीयन्ते ननु विविदिषन्तीति ज्ञानसाधनतया वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वादि
च्छायाश्च प्रत्ययार्थतया शब्दतो गुणत्वादिच्छायाश्च प्रत्ययार्थतया प्राधान्यात् प्रधान्यात् प्रधानेन च कार्यसंप्रत्ययात्। नहि
राजपुरुषमानयेति वस्तुतः प्रधानमपि राजा पुरुषविशेषणानं च कार्यसंप्रत्ययात्। नहि राजपुरुषमानयेति वस्तुतः प्रधा
नमपि राजा पुरुषविशेषणतया शब्दतः उपसर्जनीभूतमानीयते। अपि तु पुरुष एव शब्दतस्तस्य प्राधान्यात्। एतानि वमसाक्षा राम
द्विविदिषाहेतवः किंतु उदितविविदिषालक्षणपुरुषसंस्कारद्वारा च यज्ञेन वत्वादिशतसंस्काराद् इत्यादिश्रुतेः महापातकैश्चमहैश्च ब्राह्मी १३१

येक्रियते तनुः ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इत्यादिवचनैश्चतपोलावगमात् तत्तत्रश्चपित्पर्नैमित्तिककर्माणि पल
पुरुषलक्षणपुरुषसंस्कारद्वारा विविदिषाहेतवस्तपालापदाचस्य नित्यमिश्रायां वस्ततो विवरणावायामास सर्वापेक्षा च कर्माणि तमे
नं वेदानुवचनेनेत्यादिना ज्ञानसाधनत्वेन विधीयन्ते नालिच्छासाधनतया शब्दतः प्रधानापि आविरिच्छायाः पक्षा विसाधनत्वा
योगात्। वेदनस्य तत्पसर्तनस्यापि स्वर्गादिवत्साध्यतया पुरुषार्थतया भाव्यत्वेनान्वयोपपत्तेः तथा चात्मानुभवकामोप
स्तादीमनुतिष्ठेदिति विधिः पदिराप्यतइति। ननु कर्मणां पापनिवृत्तिद्वारा ज्ञानजनकत्वेऽश्रवणादिवैयर्थ्यस्यादित्याशं
क्यनहि कर्मभिः पापनिवृत्तिस्यावाहत्यज्ञानमितिप्रमाणादि विवक्षिता। किंतु कर्मानुष्ठानात्पापनिवृत्त्या शुद्धसत्वोदये स
तिविषयदोषसंदर्शनसंजातवैराग्यादिसाधनसंपत्तौ श्रवणादिद्वारेत्यभिप्रेत्याह। एवमिति। ननु श्रवणादेर्न ब्रह्मज्ञानहे
तुत्वं मानाभावाच्छोतव्य इत्यादेः श्रवणादिस्वरूपएवप्रमाणात्वात् स स्वर्गः सर्वान्प्रत्यविशेषादित्याशंक्याह एतावदरे खल्वमृतत्वमि
त्यर्थवादावगतमोक्षसाधनत्वेन बोधितस्य सन्निहितस्यैव ब्रह्मज्ञानस्य फलत्वोपपत्तेर्नाश्रुतस्वर्गादिप्रकल्पनावकाश इत्या
शयवानाह। मैत्रेयीति विधानादिति। एतच्च नियमविधिमभ्युपेत्योक्तम् ब्रह्मस्वरूपमात्रावगाहित्तयोपसाक्षात्कारजनकतया श्रव

वे:प:व्या: १३२

पव्यतिरेकसहकृतप्रत्यक्षसिद्धतयात्मविचारेपितन्मूलानुमानादेवब्रह्मसाक्षात्कारहेतुत्वसिद्धेः अपूर्वविधित्वायोगात्तावच्छ्रुतस्तत्रनि
यमोपिनसंभवति व्यावर्त्याभावात् तथाह्यात्मावारेश्रोतव्यइत्यत्रकिंविषयनियमः आत्मैवश्रोतव्यइति किंवाधा[illegible]ना
त्मैवनियमः श्रोतव्यएवेति। अन्यथाहस्त्यादेवेतिवननाद्यपूर्वः। तरतिशोकमात्मविदित्यादिश्रुत्याआत्मज्ञानस्यैवमोक्षहेतुत्वावगमेना
नात्मविचारस्याप्राप्तेः। नापिद्वितीयः मननादिविधिविरोधात्। वात्मसानायवेदान्तवाक्यमेवविचारयेदितितृतीयमविध्याअपरो
नेनपुराणवाक्यादिव्यावृत्तिसिद्धिरितिवाच्यं। आत्मावारेद्रष्टव्यइत्यादिषुवेदान्तवाक्यस्यपदार्थत्वेनाश्रवणात्। अपदार्थनि
यमेचातिप्रसंगात्। विमतंपल्यमृतादेदोमानयमतारेद्व्यतिइतिहासपुराणाभ्यांवेदंसमुपबृंहयेदितिसंभवपर्वदीवेदार्थनिर्णा
योपायत्वेनेतिहासपुराणयोरपिविचार्यत्वप्रतिपादनाच्च। किंचश्रवणानामनात्मपर्यवधारणांतदनुकूलज्ञानमानसिक्रियावात
दुभयमपिशाब्दज्ञानेहेतुः। तत्रनियमविध्याश्रयपरोश्रवणमेवशाब्दज्ञानहेतुर्नान्यदितिस्यात्तच्चनसंभवति। आकांक्षादेस्त
द्धेतुभूतस्यनिहतस्ययोगात्। अन्यस्यव्यावर्त्यस्याप्रसिद्धेः। नचैवंश्रवणस्यशाब्दज्ञानहेतुत्वेदर्शनोद्देशेनश्रवणंविधीयत
दस्यसंगतंस्यादितिवाच्यं सिद्धांतेशाब्दज्ञानस्यापरोक्षरूपतयाविरोधाभावात्। उक्तस्यश्रवणस्यतात्पर्यविषयकत्वेपिपयर् राम १३२

पर्यायात्मविषयतयाश्रोतव्यइतिनिर्देशोनविरुध्यते। किंचनवेदांतश्रवणादिविधिपरत्वेवाक्यभेदप्रसंगात्। अन्यथाब्रह्मपरत्वा
भावेब्रह्मणोसिद्धिप्रसंगः। ननुसहकार्यंतरविधिःपक्षेणतृतीयंतद्वतोविध्यादिवदित्यत्रश्रोतव्यइत्यादिवाक्यानांविध्यनपेक्ष
त्वंजड। नांतुसर्वसंगपरित्यागपूर्वकब्रह्मज्ञानेप्रवृत्तिर्नस्यादितितेषामेवप्रवृत्तिसिद्धयेविध्यंगीकरणमितिसूचितं। अन्य
थापक्षेणेतिविशेषणवैयर्थ्यापत्तेः चचानुवादत्वेपथ्यं। इत्थंत्वयमौपनिषदआत्मायतोमोक्षहेतुसाक्षात्कारसाधनविचार
विषयइतिप्रकारेणात्मनोविशुरूपाअपष्टव्यइतिवत्स्तुत्यर्थत्वेनोपपत्तेः। अतएवभाष्यकृतासमन्वयसूत्रेलिंङ्गाद
पःश्रूयमाणाअप्यनियोज्यविषयत्वात्कुण्ठीभवन्तीत्युक्तम्। अतएवचद्वितीयवर्णकेटीकाकृतायद्येवंकिंविधिनास्वयमेवनि
र्णानहेतौप्रवृत्तापसाधनेप्रवर्तनरतिविध्यभावःकंठरवेणांगीकृतः। तत्रैवचविवरणाचार्यैर्निदिध्यासितव्यइतिवाक्ये
प्रतिपादनपरवाक्येवाक्यभेदाभावायस्तुतिपरत्वादितितस्माद्धीर्यद्रष्टव्यपदसमभिव्याहारेणप्रदर्शितत्वायेनश्रोतव्य
इत्यादेर्द्रष्टव्यहेतुत्वमेवयुक्तं। नविधायकत्वमित्यालामतिविस्तरः। ननुदर्शनवच्छ्रवणादेरपिज्ञानतयानानुष्ठेयत्वमित्याशंक्याश्र
वणादिस्वरूपंनिरूपयति। श्रवणंनामेत्यादिना। ननुध्यानस्यनिदिध्यासनपदवेदनीयस्यध्येयगोचरसाक्षात्कारत्वेपिम

वे॰सू॰भ

१३३

ननु श्रवणयोर्न हेतुत्वं ध्यानेन ब्रह्मसाक्षात्कारोत्पत्तिसमयेऽपेतयोरभावादित्याशंक्याह न हि तेषामेकरूपेण हेतुत्वमिह विवक्षितं
किंतु ध्यानस्य साक्षाच्छ्रवणमननयोस्तु मनननिदिध्यासनद्वारा कारणमित्याह तन्नेत्यादि साक्षादिति। यद्यपि शक्तितास्य परि
शिष्टवेदान्तावधारणस्यैवापरोक्षस्याने साक्षात्कारणत्वं तथापि श्रवणस्यानपरोक्षनियमवादिमते ध्यानस्यैव साक्षाद्धेतुत्वाभ्युपग
मात्तदभिप्रायेणोक्तं। अथवा प्रतिबद्धब्रह्मापरोक्षज्ञानमेवानर्थनिवृत्तिहेतुः। अन्यथा तत्त्वमस्यादिवाक्यस्यापरोक्षज्ञानजनक
त्ववादिमते मनननिदिध्यासनवैयर्थ्यात्। तत्र च प्रतिबंधकनिवर्तकध्यानस्य साक्षात्कारणत्वान्न तु श्रवणादीनां तावद्दृष्टफलानामा
सत्त्वसमयधानभावेन ज्ञानहेतुत्वं तेषामेकरूपेण हेतुत्वात्। मा पिप्रमाजदर्शादिवत् शेषशेषिभावे न श्रुतिलिंगादेरप्रमा
णस्याभावादित्याशंक्य प्रधानाप्राधानोदासीन्येन कारणत्वमात्रं विवक्षितमित्याह। एतानीति। नानावत्तत्तीपेतिप्याध्यापानिरूपि
तशेषत्वलक्षणमंगत्वं नेत्यर्थः ननु कारणतायाः कादेवमप्रमाणान्मननादेरंगत्वमवसीयत इत्याशंक्य प्रधानसाधारणत्वात्तत्रत्य
निष्पादकत्वमित्यभिप्रेत्याह। तस्येति। श्रुत्यापि भावमेवोपपादयति। तथाहीति। साक्षाद्धि नियोजिका श्रुतिर्निराकृत्य तदनुमानद्वा
राविनियोजकलिंगादीत्याशंक्याह निरस्यतीति। नापीति। ननु मनननिदिध्यासनयोः प्राधान्येन प्रकरणाद्युक्तमंगत्वमवगम्यत इत्याश राम १३३

क्य सिद्धे हि श्रवणस्य ज्ञानलक्षणफलसाधनत्वेन प्राधान्य तदाकांक्षालक्षणं प्रकरणं स्यात्तदेव तु नास्ति मानाभावात् तथापि किं दर्शपूर्णमा
सवद्विध्युद्देशादप्रश्रवणात्फलान्वयः उत सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपयुज्यत इति न्यायात्तत्राद्यं निराकृत्य द्वितीयमनु
त्थापयति। न द्वितीति। अप्राप्तवेतोऽपि बहुवोपन्नविधकरिति वाक्यं श्रवणस्य ज्ञानसाधनत्वेन क्रोन्थामानं तेषां च श्रवणमेवप्रकरणी
तिपदद्वयपात्रराहोघालरमाह। किंचेति। विकृतिष्विति सौर्ययागादिष्वित्यर्थः। एवं साक्षात्प्राधान्यव्यपदेशं समर्थयति। किंतु ये
ति श्रवणमनननिदिध्यासनानां मध्ये श्रवणं प्राधानकारणं मनननिदिध्यासनं च तत्सहकारीत्यर्थः। न च ध्यानमेव साक्षात्का
रणत्वात्प्रधानमिति वाच्यं। तस्य परिशिष्टवेदान्तावधारणलक्षणश्रवणस्यप्रमेयावगमं प्रति करणत्वेन प्राधान्यात्। इदमे
व प्राधान्यं प्रथमवर्णके विवरणाचार्यैः सूचितमित्याह। सूचितं चेति। ननु ज्ञानसाधनतया श्रवणादिकं नानुष्ठेयं तत्राधिकारानि
श्चयाद् इदिके कर्मणीत निश्चयस्य प्रवृत्त्यंगत्वात् न च नित्यविवेकवैराग्यशमदमादिसंपन्नोऽधिकारीति वाच्यं। शमदमादीनां प्रक
रणोपमापीनांगत्वावगमेनाधिकारनिमित्तत्वायोगादित्यत आह। श्रवणादिष्विति मुमुक्षूणामिति। मोक्षसाधनब्रह्मज्ञानकामाना
मित्यर्थः। श्रवणादेर्ब्रह्मज्ञानफलकत्वेन तत्कामस्यैव तत्राधिकारौचित्यात्। उक्तं चैतत्पंचमवर्णके पंचपादिकाचार्यैः ब्रह्मज्ञानकामिने

वेद॰
१३५

दशाल्लंश्रोतव्यमिति। ननु सर्वाधिकारमिदं किं न स्यादित्यत आह कामप्रति। मुमुक्षूणामिति। यद्यपि मोक्षसाधनब्रह्मज्ञानं विकीर्षापाख्वाभिर्करनि
मितत्वात्तन्नैव नित्यानित्यविवेकादीनां प्रकृतो विनियोगस्तथापि मोक्षविकीर्षाहारा तत्र तेषां विनियोग इति दर्शयितुं मुमुक्षोपन्यासः न हि मो
क्षमकामयमानस्तत्साधनं ज्ञानं कामयते न च नित्यानित्यविवेकादेः फलकाम नाहेतुत्वे मानाभाव इति वाच्यं श्रवणविधिप्रकारणोत
त्संकीर्तनस्यैव मानत्वात् अन्यथा संकीर्तनवैफल्यात् तथा हि सोन्वेष्टव्य इति विधिप्रकरणे तद्यथेह कर्मचित इत्यादिना नित्यानित्यवि
वेकः परीक्ष्य लोकान् कर्मचितानित्यादिना च इहामुत्रार्थफलभोगविरागः शान्तो दान्त उपरतस्तितिक्षुरिति च शमादिर्दर्शितः। विजिज्ञा
सस्वेति विचारविधिप्रकरणे वरुणं पितरमुपससारेति श्रुत्यंतरे च तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति च गुरूपसदनं दर्शितं। न
च सर्वत्र फलरावविनियोगः स्यादिति वाच्यं। मादिषु फलश्रुतेरर्थवादत्वेन कामनोत्पादनद्वारा मुमुक्षोरधिकारप्रदर्शनार्थत्वेन वा फल
श्रुतेरुपपत्तेः तदुक्तं विवरणाचार्यैः सर्वत्र फलश्रुतयः कामनोत्पादनद्वारा मुमुक्षोरधिकारप्रदर्शनार्था इति शमदमादिशब्दात्मभेदेन व्याच
ष्टे अत इति द्वितीयेत्यादिना। अत्र संन्यासिनामेव ब्रह्मविद्यायां ब्रह्मनिष्ठभिक्षूणामाधिकार इत्यत्रो परमशब्दं ममामायेत्तः संन्यासयोगाद्यतयः
शुद्धसत्वा इति श्रुतितात्पर्यभूमाद्यो ब्रह्मपंतः समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतिं जगत्करैकवस्थिष्ठादीनां ब्रह्मविचारमन्तिपादिकामा राम १३५

त्स्यापि कौन्तेय हस्योपि विमुच्यत इति स्मृतिं चाध्यादयतस्तदुपोद्धलतया चत्वाश्रमस्य मोक्षाश्रमनामधेयाधिकं प्रकृतमासंवदतो गृहस्थादिकृत
साषणामरणामभमात्रेणा स्वात्मानमप्राधिकं मन्यमानानां ब्रह्मविचारे गृहस्थादीनामधिकारं तेषु प्रद्वेषमात्रेणाकं विद्विष्टवोद्धृषयंतीति तेषामत
माह अत्रेति। अत्र परमशब्दार्थः संन्यासस्ततः किमित्याशंक्य संन्यासस्य मुमुक्षाद्वारा विचाराधिकारनिमित्तत्वात्संन्यासिनामेवाधिका
रः सिध्यतीत्याह। तथाचेति किमुपरमशब्देन शक्त्या संन्यासावगमः उतार्थाल्लक्षणया वा तत्राद्यं निराकरोति द्वितीयं निरस्यति। विक्षेपेति
। ब्रह्मविचारविरोधिविषयांतरव्यासंगाभावस्य गृहस्थेष्वपि केषुचित्संभवेन तस्य संन्यासानुमापकत्वायोगो इत्यर्थः तृतीयं दू
षयति। तत्कादेरयीति। तथाच गृहस्थादेर्ब्रह्मविचारसंपादकश्रुत्यंतरविरोधान्न लक्षणाकल्पनमिति भावः। ततश्च मुमुक्षा
संपादकानां नित्यानित्यविवेकादीनामाश्रममात्रसाधारणत्वेनाधिकारनिमित्तस्य मुमुक्षुत्वस्यापि सर्वसाधारणत्वात् आश्रमिमा
त्राधिकारिकमेव श्रवणादिविधानमित्याह। सर्वाश्रमेति। ननु मोक्षसाधनब्रह्मज्ञानाय श्रवणादीनि कर्तव्यानीत्युक्तं तदयुक्तं। सगुणोपा
सकानां हिरण्यगर्भलोकगतानामकृतवेदांतश्रवणानामपि तत्रैव तत्र मुक्तिश्रवणादित्याशंक्य किमेतद्ब्रह्मसाक्षात्कारस्य व्यभिचारं चो
दयेन पश्चादिवदेव सगुणोपासनस्यापि साक्षान्मुक्तिहेतुत्वाभावादित्यभिप्रेत्य द्वितीयं दूषयति। सगुणेति चित्तैकाग्र्यलक्षणा निदिध्यासनद्वारा स

वेद्र.
१३५

गुणोपासनमपि ब्रह्मसाक्षात्कारहेतुरित्यर्थः ॥ ननु सगुणविषयंरूपासनं तत्कथं निर्गुणसाक्षात्कारोपयोगि अन्यविषयत्वाविहेतुत्वे अतिप्रसंगात्ला
गापि वैराग्यादिसंपन्नस्य इहैव श्रवणमनननिदिध्यासनसंभवेन नन्त एव तत्साक्षात्कारोपपत्तौ सगुणोपासनद्वारा निदिध्यासकल्पनागौ
रवं चेत्याशंकां कल्पतरुकारोक्तं समाधानमाह ॥ तदुक्तमिति ॥ येहि वैषयिकफलानुषंगरहितभवांतरानुष्ठितकर्मजनितचित्रवैमल्यात
पा अनादिदुर्वासनाविषयगोचरामुत्सार्य न तलद्भावितं वितं विषयेभ्योपकृष्यते ते निर्विशेषं ब्रह्मध्यातुमीशते तेनात्राधिकारिणः ॥ किंतु पे
अनादिदुर्वासनाजनितविषयांतरविक्षेपवशाद्गुणोपासिततेनिर्विशेषं ब्रह्मध्यातुमशक्ताः तथा तत्साक्षात्कर्तुमसमर्थास्त एव मंदानि
रूपितसगुणोपासनां मनसि सगुणब्रह्मध्यानाभ्यासाद्बहुलतयैव स्थिरेकृते सति निरुपाधिकस्यापि ध्यानस्याधिकारिणः ॥ तथा चाधिका
रिभेदान्नोपासनावैयर्थ्यमिति भावः ॥ आद्यं दोषं निरस्यति वशीकृतेति ॥ एषां सगुणोपासकानां+ न संभवेन तदेव ध्यानं निरुपाधिक
तया साक्षात्कृतं भवतीत्यर्थः ॥ तथा च विषयभेदाभावान्नातिप्रसंग इति अयुक्तं तथा सति मारब्धकर्मक्षये सत्यत्रैव विदेहकैवल्या
पत्तौ उपासकानां कार्यब्रह्मणा सह मुक्तिरित्यभ्युपगमविरोध इत्यादौ कम न हि सर्वेषामुपासकानामिहैव ब्रह्मसाक्षात्कार इति अ
भः किंतु निश्चितनात्पयकवैराग्यतावगतं तदनुकूलानुमानेन च संभावितं निर्विशेषं ब्रह्म सगुणोपासनपरवशीकृतमनस्कांतपाध्यातुं राम
१३५

समर्थास्तेषामेव निरुपाधिकध्यानाभ्यासजनितब्रह्मसाक्षात्काराज्ञारब्धभपेसत्यत्रैव मुक्तिः अन्येषां त्वकृतब्रह्मविचाराणां सगुणोपासका
नां ब्रह्मलोकं गतानां तत्रैव साधितश्रवणादिसाध्यकानां साक्षात्कृतब्रह्मभावानां कार्यब्रह्मणा सह मुक्तिरित्यभिप्रेत्याह सगुणो
पासकानां चेति ॥ उपासकानां केन मार्गेण ब्रह्मलोकगमनमित्याकांक्षायामाह अर्चिरादीति ॥ तत्राग्निर्वाय्वादयोगेनहराणां नेतार
सोर्चिरादिमार्गः तथा च श्रुतिः स एतं देवयानं पंथानमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकमिति ॥ तेर्चिषमभिस
भवंतीति ॥ ननु पथ्याग्राम जिगमिषुं प्रति किंचिन्मार्गचिह्नमुपदिशति ॥ दत्तो वनस्थाय गिरितो तत्पश्यो धर्तो ग्रामं प्राप्स्यतीति एवम
र्चिरादिरपि मार्गचिह्नमेवोपदिश्यते ॥ अचेतनत्वात् ॥ अथवा अर्चिरादयो भोगभूमयो लोकशब्दश्रवणादिति चेन्न ॥ अर्चिरादे
र्मार्गचिह्नत्वे भोगभूमित्वे वा गंतृणां गमयितृत्वाभावेन गमनानुपपत्तेः ॥ न च स्वातंत्र्येण गमनं मूर्छितादिवत्स्य संपिंडीकृतत्वा
त् ॥ तस्मादर्चिराद्यभिमानवद्देवास्वामिकं प्राप्स्तेनातिवाह्य इति तेन वायुस्वामिकं च प्राप्तो वायुनेत्यभ्युपगंतव्यं तथा चाहुरा
चार्यवाचस्पतिमिश्राः सपिंडकरणानां हि सूक्ष्मदेहतो गत्तो न स्वातंत्र्यं न चाप्याधानेतारो चेतनास्तवेति ॥ ननु विद्याभेदेन द
र्थेसति सगुणविद्यावतामर्चिरादिमार्गेणेति विशेषोक्तिर्युज्यते न च निर्गुणविद्यावतां मार्गेत्याशंकां पुरापकर्मणां मार्गांतरस

वद्र
१३६

ज्ञात्वा तदपेक्षया मार्गविशेषकीर्त्तनमित्याह। कर्मिणामिति। धूमेति कर्मिणां मार्गविशेषजिज्ञासायां तत्कीर्त्तनमेव युक्तं तथापि प्रसंगात्तेषामुपभोग
पुनरावृत्त्यादिकीर्त्तनं। आतएव वक्ष्यति दक्षिणायनं संसारादागतप्रयचेतेति। शुक्लकार्णानुलधमदिनार्चिरादिना वा मार्गेण गमनप्रसक्तिः किं
तु येन केन चित्कुत्सितेन मार्गेण भयंकरं धूम्ररूपं नरकविशेषपातनमित्याह। प्रतिषिद्धानुष्ठानिनां लितितिनन्तु निर्गुणविद्यावतोपिगति
रंगीकार्या विद्यावत्त्वाविशेषात्। एनान्ब्रह्मगमयतीत्यमानवपुरुषस्य परब्रह्मगमयितृत्वश्रवणाच्च नवेदं ब्रह्मपदं कार्यब्रह्मपरं तत्प्रांतं स
कस्य परस्मिन्नेव ब्रह्मणि रूढस्य मुख्यार्थत्वसंभवे गुणाकल्पनया कार्यपरत्वायोगात्। किंचेदं ब्रह्मप्राप्यं तस्य सर्वात्मकस्य सर्वपरंपरब्रह्म
परमेव तत्त्वम् कारणोऽस्य प्रमाणत्वादित्यत आह। निर्गुणेति। अयं भावः नतावत्स्वं ब्रह्मप्राप्यं तस्य सर्वात्मकस्य सर्वदा प्राप्तत्वात् तानचाप्राप्त
त्वभ्रमात्प्राप्तमेव प्राप्नोतीति संप्रतं तात्त्वमस्यादिवाक्यजन्यसाक्षात्कारात्प्राणादर्शभ्रमसंभवेपि तत्त्वदसंभवात्तस्मारगत्या कार्यब्रह्मणपे
वकथंचिद्ब्रह्मशब्दो व्याख्येयः ततश्चामानवः पुरुषः सगुणोपासकानामेव लोकांतरवर्त्तिकार्यब्रह्मप्रापयतीत्यभ्युपेयं तदाहुराचार्यवाचस्प
तिमिश्राः कार्यस्यापि प्राप्यपूर्वत्वादप्राप्तप्राप्यगतिः प्राप्यपेद्ब्रह्मणपरं प्राप्तत्वाज्जगदात्मकत्वात्तर्हि साक्षात्कारवतः सद्यएव विदेहकैवल्यमा
दितिशंकते। किंतितिप्योतिषो मार्दिजन्यस्वर्गस्यैहिकशरीरेणोपभोग्यस्य प्रारब्धकर्मणा प्रतिबंधात्तत्रा शनांतरमेव विदेहकैवल्यमित्याह राम
१३६

पावदिति। प्रारब्धकार्यं पुण्यकल्पादिपर्यंतमनु मोक्षव्यं सुखदुःखादिरूपं येन तत्प्रारब्धकर्म यथा वसिष्ठादीनां पौरोहित्यादिप्रापकं मतं च मक्षिप्रश
रवन्मध्येन विनश्यतीति किंतु स्वकर्त्तृसकर्त्तृसकलभोगमुक्त्वा घेवशाम्यतीत्यर्थः। ब्रह्मसाक्षात्कारवतः प्रारब्धकर्मविस्थानमक्षिपतिनन्विति
। श्रुतिस्मृतिभ्यां प्रारब्धकार्याणां देहपातलक्षणावधिमतीश्वावगमेन क्षीयंते चास्य कर्माणीति सामान्यश्रुतेरनारब्धकार्यकर्मविनाश
परत्वादनारब्धकार्याणामेव सुकृतदुष्कृतकर्मणां विधायामप्यादिनाशमित्याह। तस्येति। अन्यथा पादिवषाणां हिरण्यगर्भमनूदालकप्र
भृतीनां ब्रह्मसाक्षात्कारवतां सद्यो न जीवितं भवेत् प्रयतेषां श्रुतिस्मृतीतिहासपुराणेषु तत्त्वज्ञानां महाकल्पसमयांतजीविताचानस्ये
ते महाविद्ये। न ब्रह्मविदः ब्रह्मविदश्च वाल्यपुराणपशास्त्रो मनुष्याइतिसंभवति तस्मादागमानुसारेणामारब्धकार्याणां सत्यपि तत्त्वसाक्षात्का
रेवृत्यान्युक्तमिति भावः। ननु पदितस्य तावदेव चिरमिति प्रारब्धकर्मविस्थानमपि तिपादकश्रुत्यंतरवशात् क्षीयंते चास्य कर्माणीति सामान्य
श्रुतेरनारब्धकार्यपरत्वं तर्हि यथा पुष्करपलाशआपो न श्लिष्यंते एवं हास्य सर्वे पाप्मानः प्रधूयंते इति विशिषश्रवणात्सामान्यवचनं न्या
येकर्मविशेषवपसंहरणीयं चाधर्मस्य रागादिनिबंधनतपाशास्त्रीयेन ब्रह्मज्ञानेन विनाशोयुक्तः। धर्मब्रह्मज्ञानयोस्तु शास्त्रीयत्वेनन्यो
तिष्ठोमदर्शपूर्णमासवदविरोधान्नोछेद्योछेदकभावः अन्यथानुत्पन्नफलस्यापि धर्मस्य नाशे स्वर्गादिसाधनत्वमतिपादकज्योतिष्टोमवा

वरु
१३७

कास्यामाभावापत्तेः तस्माद्दुष्कृतमेव संचितं कर्म ज्ञानं विनाप्यभिलाशंकमनाहियापस्य संचितपापत्वमयुक्तं विद्यानिवर्त्यत्वं किंतु तन्निवर्त्याः विद्यानिवंधन
त्वमयुक्तं तद्भेतत्सुकृतेप्यविशिष्टं भेएवं विषयेतत्तरतीति श्रुत्यंतरे सुकृतदुष्कृतयोरुभयोरपि ज्ञाननिवर्त्यत्वश्रवणात् एवं हास्य सर्वे पाप्मानः प्रदू
यंत इत्यादिश्रुतेरपि सुकृतदुष्कृतनाशपरत्वात् इह च प्रयोगश्चायं पुण्येपि पाप्मशब्दस्तु यथा पुण्यपापे उपकम्यस सर्वे पाप्मानो निवर्त्तंत इत्य
त्र ततश्च सुकृतदुष्कृतभेदेन द्विविधमपि ब्रह्मज्ञाननिवर्त्यमित्यभिप्रेत्याह संचितमिति तस्य पुत्र इति। पयपि सर्वात्मकस्य ज्ञानिन इष्टद्विष
द्विष्टविभागो नास्ति तथापि ज्ञानपूर्वकाज्ञानाभिप्रायेणापरिहर्त्तव्यावात्तत्संभवादिति वोध्यं ब्रह्मज्ञानाज्ञाननिवृत्तेन जानामीति व्यवहारात् तन्नि
वंधनसंचितकर्मनिवृत्तिप्रसंगात् च विद्यातो विशेषाभावप्रसंगाच्च तन्निवृत्तौ जीवन्मुक्तस्य देहादिप्रपंचोनुपपन्न इति चोदयति। नन्विति
।जीवन्मुक्तज्ञानात् ब्रह्मसाक्षात्कारात् पारमार्थिकत्वव्यावहारिकत्वसंपादनपटीयःशक्तिविशिष्टाज्ञानविनाशेपि प्रातिभासिकत्वसंपादनपटीयःश
क्तिविशेषविशिष्टाज्ञानस्यानिवृत्तेर्देहादिधारणं संप्रयुक्तमित्यभिप्रेत्याह तिप्रतिवंधेति। ननु सर्पवाधेपि भयकंपानुवृत्तिवज्जीवन्मुक्तस्याविद्या
संस्कारवशाद्देहादिप्रपंचोस्तु किं शक्तिविशेषविशिष्टाज्ञानकल्पनया गौरवात् शक्तिभेदे मानाभावाच्चेति चेन्न। अविद्योपादेयदेहादि
प्रपंचस्य तन्निवृत्तावस्थानायोगात् न च तत्त्वज्ञानोत्तरकालीनदेहादेरविद्यासंस्कार एवोपादानं नाविद्येति वाच्यं संस्कारस्यापि भावकार्यत्वपाउपादा

राम
१३८

नाविद्यमानत्वेन सत्यायाद्यानत्वे सत्यत्वापत्तेः नाविद्याया एव उपादानत्वेन तन्निवृत्तौ संस्कारस्याप्यनुपपत्तेः सर्पादिभ्रमवाधेपि भयकंपानुवृत्तिर्न भ्रम
संस्कारादिना भंतरमपि स्मरणानुपपन्नः संस्कारस्य तावत्कालं स्थापित यावत्पर्यंतं भयाद्यनिवृत्त्यापत्तेः किंतु सर्पभ्रमजनितभयप्रयु
क्तधातुवैषम्यविशेषादेव धातुवैषम्यस्य च कार्यानुसारेण तावत्कालावस्थायीति कल्प्यते ततो न संस्कारवशाज्जीवन्मुक्तस्य देहादिप्रपं
चः किंतु शक्तिभेदविशिष्टाज्ञानात् नि च शक्तिभेदे मानाभावः कार्यवलेनैव तत्कल्पनात् तथा हि यथा विक्षेपावरणात्मककार्यद्वयवले
न तदनुकूलं शक्तिद्वयं कल्प्यते तथेहाप्यश्रुतवेदांतानां प्रपंचे पारमार्थिकत्वभ्रमः श्रुतवेदांतानामनुत्पन्नब्रह्मसाक्षात्काराणां व्याव
हारिकत्वभ्रमः उत्पन्नब्रह्मसाक्षात्काराणां प्रातीतिकत्वभ्रमः जनकयाज्ञवल्क्योद्दालकोद्भवच प्रह्लादप्रभृतीनां यावद्देहपातं प्रातिभासिक
त्वभ्रमदर्शनविद्यायास्त्रिविधभेदैः श्रौतयौक्तिकलौकिकैरिति भावानैरुक्तं। अत एव शास्त्रे ज्ञाननश्यति परमार्थत्वभ्रमं नश्यति वा परोक्ष्या
त्व्यावहारिकत्वभ्रमभारध्वनाशात् प्रातिभासमात्रमिति शक्तित्रयं स्पनाशादत्युक्तं। तथा च श्रुतिः तस्याभिध्यानाद्योजनात्तत्वभावात् भूय
श्चांते विश्वमायानिवृत्तिरिति सर्वशक्तिविशिष्टाज्ञाननिवृत्तिरित्यर्थः। ननु कस्यापि मुमुक्षभविष्णुकवामदेवादिमुक्तिप्रतिपादकश्रुतिस्मृतिवि
रोधइत्यपरूच्यामतांतरमाह परेत्विति। ननु लाघवसहकृतानुमानानुगृहीतानामजामित्येकवचनश्रुतिविरोधान्नाविद्यानानात्वं। वक्ष्यमाण

वे॰शि॰
१३२

री।त्वात्तद्दोषनिरासासंभवादित्यस्वरसात्त्वमानात्मोहाद्येवेति एकमुक्तौ न सर्वमुक्तिरित्येतत्स्वत्रकारवचनेनापि द्रष्टव्यम् ।तत एवेतानन्वेतत्स्वत्रमन्य
परं कल्पितमित्यत आह तद्वक्तौ नेति तथा चैकमुक्तौ न सर्वमुक्तिरित्यभ्युपगमाद्वैतदधिकरणविरोधो दुर्वार इति आह एतच्चेति निन्वेकाविद्याप
ज्ञाननाशात्तत्त्वमभ्युपगतमतेप्येकमुक्तौ न सर्वमुक्तिरेवं तदपसारकावरणशक्तिनिवर्त्यादूपेनैतत्त्वनियामकाभावेन ब्रह्मसाक्षात्कारात्सर्वावरणशक्तिवि
शिष्टाविद्याविनाशावश्यंभावादित्याशंक्यपर्याश्शुक्तिसाक्षात्कारात्फलबलेनैकावरणशक्तिविनाशापर्यासर्वज्ञानप्रागभावहत्तिस्वरूप
प्रयोजनसाक्षेनेन कस्याचिदेवप्रागभावस्य निवृत्तिरेवमन्यत्रापि भूतमपंचोपलंभानुरोधेनपरमब्रह्मज्ञानेनतदीयानर्थनिवृत्तिहेत्वावरणशक्तेरेव नाशः।मा
न्यदीयसंस्कारहेत्वावरणशक्तीनामिति व्यवस्थोपपद्यतइत्याहतस्मादिति।परिच्छेदमतिपाद्यमर्थं निगमयति।तदेवमिति।प्रमाणान्तंतत्तत्प्रमा
णानां स्वादोवनः ततज्ज्ञातव्यं तु यौगिकमाहि विडंबोधनंसुवर्णरसेविलाकालोक्यनिरेषामपाकृता।विडंबनं तुपासनं तु वेदांतसिद्धामदार्थलंक्रिया॥ अ
नेनमहेशमेवं घेन वेदांतार्थविवेकं विना।गुरूपलब्धेनतारकं ब्रह्मतुष्यतु।वंदेहं वदंनीयानां वंद्यानां वामनाध्वरीकामितः शेषकल्पारागकलनाकल्पवल्लरीम्
इति श्रीमद्धर्मराजाध्वरींद्रात्मजरामकृष्णाध्वरिविरचिते वेदांतशिखामणौ अष्टमः परिच्छेदः॥ समाप्तश्चायं ग्रंथः संवत।श्री रामाय रामिलिखितमि

राम
१३२

123